## ।। अथ तृतीयोऽध्याय: ।। Chapter-3

माधातोवाच:- तत्रागत्य मुनिश्रेष्ठ यत्कृतं गौतमेन वै ।
(१) ए(१) ए(२)
विस्तरेण तदाचक्ष्व परं कौतूहलं हि न: ।। १

बी(१)
वसिष्ठ उवाच :- श्रूयतां राजशार्दूलकथां पापप्रणाशनीम् ।
बी(२)
यत्र तेपे तपोऽत्युग्रं गौतम: सुमहातपा : ।। २

२(१)
तत्र यात:समं शिष्यैश्चिकीर्षुष्कर् तप: ।
बी ३
गौतम: पृथिवीपाल तदा त्रैलोक्यविश्रुत ।। ३

(२)
सरस्त्र्यंबकं नाम त्र्यंबकाध्युषितं सदा ।
तद्ददर्श महारम्यं स्वच्छोदकपरिप्लुतम् ।। ४

बी ४ बी(५)
तत्र पुष्पफलोपेतं नानाविहंगनादितै : ।
(६) (७)
गंधर्वाध्यासितदिक्चक्रै: सज्जलाबुदसुंदरै: ।। ५

सर्वत्रफलपुष्पाढ्यै: सिद्धगंधर्वसेवितै: ।
पादपै: परित: कीर्णं तरंगोर्मिसमाकुलम् ।। ६

मिथस्तरंगसंघट्ट संजातमुरजस्वनम् ।
(८) (३)
भृंगफंकृतगीताढ्यं नृत्यत्केकिसितच्छदम् ।। ७

बी(९)
सुगंधिसहितांभोजराजिराजितमायतम् ।
(४)
मन: प्रह्लादजनकं सर्वपातकनाशनम् ।। ८

-----

१- ई बी- प्रणाशिनी । २- ई बी- गौतम, ३- ई बी ३ विश्रुत:, ४- ई बी- पत्रपुष्प ५- ई बी- तो, ६- ई बी- गंधर्वा, ७- ई बी- सजातमहजस्वनं, ८- ई बी- भृंगुफंकृतीताढ्यं नृत्यत्केकेशतच्छदं (ए) नृत्यत्कोकित, ९-बी भोजभोज राजेत ।

-----

ए (१) कौतूहलं ए (२) स्त्रे
ए (३) नृत्यन्कोकिलसितच्छदम् ए (४) प्रल्हाद ।

---------

ए (१) नुरूहः
तद्विलोक्य मुनिः प्रीतः संप्रहृष्टतनूरुहः ।
शिष्यमुत्तंकमाहेदं हर्षगद्‌गदया गिरा ।। ९

ए(२)
गौतम उवाचः- इदं मम मनोहारि हरनामांकितं सरः ।
१(१)
सुधाकुंडमिवस्वच्छं वत्सोत्तंक विलोकय ।। १०

बी१
विष्वक् परिवृतं सिद्धैर्मुनिभिःसंयतात्मभिः ।
बी-२ (३)
स्वर्गापवर्गलाभाय योगिभिश्च मुमुक्षुभि ।। ११

बी-३
इतस्ततोऽपि मे दृष्टिः स्पृह्यालुः प्रवर्तते ।
बी ४
यथातीर्थमये देशे मनोवृत्तिस्तपस्विनाम् ।। १२

तदिहावेदयतां स्थानं विविक्तं सुखमासितुम् ।
पंक-कंटकविहीनं तीर्थकोमलवालुकम् ।।
वि
सुच्छायफलपुष्पाढ्यं शाखिखंडावृतं शुचि ।। १३

५
तन्निशम्य गुरोर्वाक्यमुत्तंको नृपसत्तम ।
६
विष्वक् प्रदक्षिणीकृत्य गौतमाय न्यवेर्दयत् ।। १४

उत्तंक उवाच :- तीरातीरं परिभ्रम्य वीक्षितं शतशो मया ।
त्र्यंबकसरः श्रेष्ठमादरान्मुनिपुंगव ।। १५

अंगुल्यर्द्धमपि स्थानं तदत्र नहि विद्यते ।
ध्यानार्पितदृशो यत्र वसंति परमर्षयः ।। १६

---

१- ई बी - मुरभि , ई-(१) १ वत्सोतं, २- बी स्वर्गापि,
३-बी लः, ४- ई बी ४ तथा, ५- ई बसिष्ठ उवाच, ६- ई निवेदयन्

---

ए (१) नुरू
ए (२) री
ए (३) मि

नातिदूरेऽतिरम्याणि दृश्यंते काननानि वै ।
बी(१)
क्रियतामाश्रमस्तत्र कृष्णे ते यदि रोचते ।। १७

वसिष्ठ उवाच:- तदाकर्ण्य महीपाल गौतमो मुनिसत्तम: ।
सुचिरं चिंतयामास न शांतिमधिगच्छति ।। १८

वृक्षाद्वृक्षांतरं याति तीरात्तीरं वनाद्वनम् ।
(बी२)
न चकार मन: स्थातुं देशे मुनिजनान्विते ।। १९

बी ३
चिरं निश्वसतस्तस्या अच्छायामुपेयुष: ।
आजगाम तपोराशि: कृपालुर्नारदस्तदा ।।
बी ४
प्रत्युवाच स्मितं कृत्वा गौतमं प्रति भूमिप ।। २०

नारद उवाच :- कोऽयं चिंताभियोगस्ते हृदि, मोहस्तपोधन ।
इत: प्रयाहि सविधे रम्यं वरुणाकाननम् ।। २१

तत्रास्ति कुंडमतुलं पुण्यवारिसुसंभृतम् ।
४(२)
तीर्थानामुत्तमंतीर्थं गुह्यं परमपावनम् ।। २२

यत्र पूर्वं तपस्तेपे वरुणो यादसांपति: ।
प्रतीच्यामाधिपत्यं वै लब्धवान्परमेश्वरात् ।। २३

-------

१ - ई बी क्रियेयदिरोचते , २- ई वी- गनस्तातुं, ३- ई बी आच्छायामुपायुष , ४- ई बी प:, ४ -(१) हृदिमोघस्तपोधन ४- ई (२) तीर्था , बी -५ परमेश्वर, ई ५(१) परमेश्वरो ।

-------

वसिष्ठ उवाच :- तत: प्रीतिमना भूप संपूज्य ब्राह्मणा:सुतम् ।
आपृच्छ्य चाश्रमं चक्रे चिरं तप्त्वं महत्तप: ।। २४

ए(१)
पंचगव्यूतिमात्रं तत पवित्रं पितृतारकम् ।
(बी-२)
विहितं गौतमेनेह तपोभिस्तर्पिता: सुरा: ।। २५

------

इति श्री स्कंद पुराणे एकाशीति साहस्र्यां संहितायां ब्राह्मय विभागे तृतीय परिच्छेदे श्रीमाल महात्म्ये गौतम श्रेयंकरसर: तथा वरुण कानन गमनं नाम तृतीयोऽध्याय: ।।

------

१- ई बी - सत्पराज्यंब्राह्मणा: ,
(बी-२) ई - गौतमेनहैतापोभिस्त पामरै:
(२) -ई-२- चिरत सुमहत्तप:

ए (१) व्यु

------